No. ३४९६

Title चामुण्डा यन्त्र पूजन विधि:

Author x

Extent 3 Age x

Subject तन्त्रम्

चामुंडा यंत्र पूजन विधिः

३४९६


3496

F = 3

ॐ भ्रांत्यै नमः २४ इति चतुर्विंशतिदलपूजा ततो भूग्रहे पूर्वा
दिक्रमेण इंद्राद्यष्टौ दिक्पालान्पूजयेत् पूर्वे ॐ इंद्राय न
मः आग्नेये ॐ अग्नये नमः दक्षिणे ॐ यमाय नमः नैरृते
ॐ निरृतये नमः पश्चिमे ॐ वरुणाय नमः वायव्ये ॐ वा
यवे नमः कुबेरे ॐ सोमाय नमः ईशाने ॐ ईशानाय नमः
इति पूजयेत् ततो देव्याः दक्षिणपार्श्वे शिवं पूजयेत्
ॐ अस्य श्रीषडक्षरमंत्रस्य वामदेवऋषिः पंक्तिश्छंदः शि
वो देवता शिवपूजने विनियोगः ॐ नमः शिवाय इति मंत्रः

ॐ चं चामुण्डायै नमः इत्यष्टदलपूजा ततः चतुर्विंशतिदलपूजा
पूर्वादिप्रदक्षिणक्रमेण कार्या पूर्वपत्रे ॐ विष्णुमायायै नमः
१ ॐ चेतनायै नमः २ ॐ बुद्ध्यै नमः ३ ॐ निद्रायै नमः ४ ॐ क्षुधा
यै नमः ५ ॐ छायायै ६ ॐ शक्त्यै नमः ७ ॐ तृष्णायै नमः ८ ॐ क्षा
न्त्यै नमः ९ ॐ जात्यै नमः १० ॐ लज्जायै नमः ११ ॐ शान्त्यै नमः १२
ॐ श्रद्धायै नमः १३ ॐ कान्त्यै नमः १४ ॐ लक्ष्म्यै नमः १५ ॐ धृत्यै न
मः १६ ॐ वृत्त्यै नमः १७ ॐ श्रुत्यै नमः १८ ॐ स्मृत्यै नमः १९ ॐ द
यायै नमः २० ॐ तुष्ट्यै नमः २१ ॐ पुष्ट्यै नमः २२ ॐ मात्रे नमः २३

णीयै नमः ४ ॐ मं भीमायै नमः ५ ॐ मं कामर्य्यै
६ इति षट्कोणपूजा ततः पूर्वादि अष्टपत्रेषु
पूर्वपत्रे ॐ बं ब्राह्म्यै नमः १ आग्नेयप
त्रे ॐ मं माहेश्वर्यै नमः दक्षिणे ॐ कं
कौमार्य्यै नमः नैरृते ॐ वं वैनायक्यै
नमः पश्चिमे ॐ वं वाराह्यै नमः वायव्ये
व्ये ॐ नं नारसिंह्यै नमः उत्तरे ऐं ऐं ऐंद्रयै नमः
ॐ



न्ह्यथकरयक्मूलमंत्रेण इतिस्वेष्टार्चनम् ततः त्रिकोणस्य
2 पूर्वकोणे ॐ ब्रह्मसरस्वतीभ्यां नमः १ नैरृतकोणे ॐ विष्णु
लक्ष्मीभ्यां नमः २ वायव्यकोणे ॐ शिवगौरीभ्यां नमः ३ इति
द्वितीयावरणम् उत्तरे ॐ वज्रनखदंष्ट्रायमहासिंहायनमः
दक्षिणे ॐ महिषायनमः इति तृतीयावरणम् ततः षट्को
णस्य पूर्वकोणे ॐ नंनंदजायै नमः १ ततः प्रदक्षिणक्रमेण
ॐ रं रक्तदंतिकायै नमः २ ॐ शं शाकंभर्यै नमः ३ ॐ दुं दु

अथ यंत्रपूजाप्रयोगः मूलेनाचम्य ऐशे ॐ ग्लौं गं गणपतये
नमः १ आग्नेये ॐ क्षं क्षेत्रपालायनमः २ नैरृते ॐ वं वटुका
वायव्ये ३ यनमः ३ ॐ यं योगिनीभ्यो नमः ४ इति प्रथमावरणम् ततो विं
दुमध्ये देवीं ध्यात्वा मूलेन षोडशोपचारैः देवीं पूजयेत् ध्या
नम् तरुणार्कनिभां त्रिलोचनां द्विभुजां तूर्यपात्रावामस्तनस्थिताम्
मधुपानपरां परां हृदि श्रीश्रीचक्रांकगतां भजे चण्डिकाम्
इति ध्यात्वा पुष्पासनपाद्यार्घाचमनीयस्नानीयवस्त्रग
न्धाक्षतपुष्पधूपदीपनैवेद्याचमनीयतांबूलादिभिः पूजये

॥ अस्यश्री चामुंडामंत्रस्य ब्रह्मवि
ष्णुमहेश्वराः ऋषयः गायत्र्युष्णिगनु
ष्टुप्छंदांसि महाकाली महालक्ष्मी
महासरस्वत्यो देवता नंदाशाकं
भरी भीमाः शक्तयः रक्तदंतिका दुर्गा
भ्रामर्यो बीजानि अग्निवायुसूर्य
तत्वानि चामुंडाप्रजपे विनियोगः